# Bhagya Suktam or Pratah Suktam

# ભાગ્યસૂક્તમ્ અથવા પ્રાતઃ સૂક્તમ્

## Document Information

Text title : bhAgyasUkta or Pratah Suktam

File name : bhAgyasUktam.itx

Category : veda, svara, sUkta

Location : doc_veda

Proofread by : Palak

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm

Latest update : October 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2023

*sanskritdocuments.org*

# ભાગ્યસૂક્તમ્ અથવા પ્રાતઃ સૂક્તમ્

ઋગ્વેદસંહિતાયાં સપ્તમં મણ્ડલં, એકચત્વારિંશં સૂક્તમ્ ।

ઋષિઃ - વસિષ્ઠઃ, દેવતા- ૧ લોઙ્ગોક્તાઃ, ૨-૬ ભગઃ, ૭ ઉષાઃ,

છન્દઃ - ૧ નિચૃજ્જગતી, ૨, ૩, ૫, ૭, નિચૃત્રિષ્ટુપ્, ૪ પઙ્ક્તિઃ, ૬ ત્રિષ્ટુપ્

સ્વરઃ - ૧ નિષાદઃ, ૨, ૩, ૫-૭ ધૈવતઃ, ૪ પઞ્ચમઃ ।

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હુવેમ ॥ ૭.૦૪૧.૦૧
પ્રાતર્જિતં ભગમુગ્રં હુવેમ વયં પુત્રમદિતેર્યો વિધર્તા ।
આધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિદ્રાજા ચિદ્યં ભગં ભક્ષીત્યાહ ॥ ૭.૦૪૧.૦૨
ભગ પ્રણેતર્ભગ સત્યરાધો ભગેમાં ધિયમુદવા દદન્નઃ ।
ભગ પ્ર ણો જનય ગોભિરશ્વૈર્ભગ પ્ર નૃભિર્નૃવન્તઃ સ્યામ ॥ ૭.૦૪૧.૦૩
ઉતેદાનીં ભગવન્તઃ સ્યામોત પ્રપિત્વ ઉત મધ્યે અહ્નામ્ ।
ઉતોદિતા મઘવન્સૂર્યસ્ય વયં દેવાનાં સુમતૌ સ્યામ ॥ ૭.૦૪૧.૦૪
ભગ એવ ભગવાઁ અસ્તુ દેવાસ્તેન વયં ભગવન્તઃ સ્યામ ।
તં ત્વા ભગ સર્વ ઇજ્જોહવીતિ સ નો ભગ પુરએતા ભવેહ ॥ ૭.૦૪૧.૦૫
સમધ્વરાયોષસો નમન્ત દધિક્રાવેવ શુચયે પદાય ।
અર્વાચીનં વસુવિદં ભગં નો રથમિવાશ્વા વાજિન આ વહન્તુ ॥ ૭.૦૪૧.૦૬
અશ્વાવતીર્ગોમતીર્ન ઉષાસો વીરવતીઃ સદમુચ્છન્તુ ભદ્રાઃ ।
ઘૃતં દુહાના વિશ્વતઃ પ્રપીતા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૧.૦૭

(યો માઽગ્રે ભાગિનગં સન્તમથાભાગં ચિકીઋષતિ ।
અભાગમગ્રે તં કુરુ મામગ્રે ભાગિનં કુરુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।)

સ્વરરહિતમ્ ।

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હુવેમ ॥ ૭.૦૪૧.૦૧
પ્રાતર્જિતં ભગમુગ્રં હુવેમ વયં પુત્રમદિતેર્યો વિધર્તા ।
આધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિદ્રાજા ચિદ્યં ભગં ભક્ષીત્યાહ ॥ ૭.૦૪૧.૦૨
ભગ પ્રણેતર્ભગ સત્યરાધો ભગેમાં ધિયમુદવા દદન્નઃ ।
ભગ પ્ર ણો જનય ગોભિરશ્વૈર્ભગ પ્ર નૃભિર્નૃવન્તઃ સ્યામ ॥ ૭.૦૪૧.૦૩
ઉતેદાનીં ભગવન્તઃ સ્યામોત પ્રપિત્વ ઉત મધ્યે અહ્નામ્ ।
ઉતોદિતા મઘવન્સૂર્યસ્ય વયં દેવાનાં સુમતૌ સ્યામ ॥ ૭.૦૪૧.૦૪
ભગ એવ ભગવાઁ અસ્તુ દેવાસ્તેન વયં ભગવન્તઃ સ્યામ ।
તં ત્વા ભગ સર્વ ઇજ્જોહવીતિ સ નો ભગ પુરએતા ભવેહ ॥ ૭.૦૪૧.૦૫
સમધ્વરાયોષસો નમન્ત દધિક્રાવેવ શુચયે પદાય ।
અર્વાચીનં વસુવિદં ભગં નો રથમિવાશ્વા વાજિન આ વહન્તુ ॥ ૭.૦૪૧.૦૬
અશ્વાવતીર્ગોમતીર્ન ઉષાસો વીરવતીઃ સદમુચ્છન્તુ ભદ્રાઃ ।
ઘૃતં દુહાના વિશ્વતઃ પ્રપીતા યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૪૧.૦૭

(યો માઽગ્ને ભાગિનગં સન્તમથાભાગં ચિકીર્ષતિ ।
અભાગમગ્ને તં કુરુ મામગ્ને ભાગિનં કુરુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।)

The complete bhAgyasUktam includes the following

ઋગ્વેદસંહિતાયાં અષ્ટમં મણ્ડલં, સપ્તચત્વારિંશં સૂક્તમ્ ।
ઋષિઃ - વસિષ્ઠઃ, દેવતા- ૧૪-૧૮ આદિત્યાઉષાશ્ચ,
છન્દઃ - ૧૫, ૧૬, ૧૮,ભુરિક્ત્રિષ્ટુપ્, ૧૭ સ્વરાટ્ત્રિષ્ટુપ્, ૧૪ ત્રિષ્તુપ્
સ્વરઃ - ૧૪-૧૮ ધૈવતઃ ।

યચ્ચ ગોષુ દુષ્ષ્વપ્ન્યં યચ્ચાસ્મે દુહિતર્દિવઃ ।
ત્રિતાય તદ્વિભાવર્યાપ્ત્યાય પરા વહાનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૪
નિષ્કં વા ઘા કૃણવતે સ્રજં વા દુહિતર્દિવઃ ।
ત્રિતે દુષ્ષ્વપ્ન્યં સર્વમાપ્ત્યે પરિ દદ્મસ્યનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૫
તદન્નાય તદપસે તં ભાગમુપસેદુષે ।
ત્રિતાય ચ દ્વિતાય ચોષો દુષ્ષ્વપ્ન્યં વહાનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૬

યથા કલાં યથા શફં યથ ઋણં સંનયામસિ ।
એવા દુષ્ષ્વપ્ન્યં સર્વમાપ્ત્યે સં નયામસ્યનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૭
અજૈષ્માદ્યાસનામ ચાભૂમાનાગસો વયમ્ ।
ઉષો યસ્માદ્દુષ્ષ્વપ્ન્યાદભૈષ્માપ તદુચ્છત્વનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૮

ઋગ્વેદસંહિતાયાં દશમં મણ્ડલં, ચતુઃષષ્ટ્યુત્તરશતતમં સૂક્તમ્ ।
ઋષિઃ - પ્રચેતાઃ, દેવતા દુઃસ્વપ્નઘ્નમ્,
છન્દઃ - ૫ પઙ્ક્તિઃ, સ્વરઃ - ૫ પઞ્ચમઃ ।

અજૈષ્માદ્યાસનામ ચાભૂમાનાગસો વયમ્ ।
જાગ્રત્સ્વપ્નઃ સંકલ્પઃ પાપો યં દ્વિષ્મસ્તં સ ઋચ્છતુ યો નો દ્વેષ્ટિ તમૃચ્છતુ ॥ ૧૦.૧૬૪.૦૫

હરિઃ ૐ ।

સ્વરરહિતમ્ ।

યચ્ચ ગોષુ દુષ્ષ્વપ્ન્યં યચ્ચાસ્મે દુહિતર્દિવઃ ।
ત્રિતાય તદ્વિભાવર્યાપ્ત્યાય પરા વહાનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૪
નિષ્કં વા ઘા કૃણવતે સ્રજં વા દુહિતર્દિવઃ ।
ત્રિતે દુષ્ષ્વપ્ન્યં સર્વમાપ્ત્યે પરિ દદ્મસ્યનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૫
તદન્નાય તદપસે તં ભાગમુપસેદુષે ।
ત્રિતાય ચ દ્વિતાય ચોષો દુષ્ષ્વપ્ન્યં વહાનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૬
યથા કલાં યથા શફં યથ ઋણં સંનયામસિ ।
એવા દુષ્ષ્વપ્ન્યં સર્વમાપ્ત્યે સં નયામસ્યનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૭
અજૈષ્માદ્યાસનામ ચાભૂમાનાગસો વયમ્ ।
ઉષો યસ્માદ્દુષ્ષ્વપ્ન્યાદભૈષ્માપ તદુચ્છત્વનેહસો વ ઊતયઃ સુઊતયો વ ઊતયઃ ॥ ૮.૦૪૭.૧૮

અજૈષ્માદ્યાસનામ ચાભૂમાનાગસો વયમ્ ।
જાગ્રત્સ્વપ્નઃ સંકલ્પઃ પાપો યં દ્વિષ્મસ્તં સ ઋચ્છતુ યો નો દ્વેષ્ટિ તમૃચ્છતુ ॥ ૧૦.૧૬૪.૦૫

હરિઃ ૐ ।

The initial portion is also referenced as
taittarIya brAhmaNam aShTakam 2, prashnaH 8, anuvAka 9
in the mantrapuShpam book.

*Bhagya Suktam or Pratah Suktam*

pdf was typeset on August 14, 2023

Please send corrections to *sanskrit@cheerful.com*